Nrisimhatirtha Akhyanavarnanam

नृसिंहतीर्थाख्यानवर्णनं

Document Information

Text title : Nrisimhatirtha Akhyanavarnanam

File name : nRRisiMhatIrthAkhyAnavarNanam.itx

Category : vishhnu, dashAvatAra, mAhAtmya, padmapurANa, tIrthakShetra, viShNu

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa. padmapurANe vatsagulmamAhAtmye chaturdasho.adhyAyaH

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 27, 2025

sanskritdocuments.org

नृसिंहतीर्थाख्यानवर्णनं

स वै पुराणपुरुषश्चिदात्मा महानुभावः सहसाविभिद्य ।
स्तम्भं महोग्रेण च वर्त्मना मुहुर्वक्त्रं लिहन्सद्रसनायकेण ॥ १॥

मुखं मृगेन्द्रस्य दधार देवो वपुर्नरस्याथ शुभं चकार ।
दंष्ट्राकरालं रसनालिर्हतमुग्रं सुताम्राक्षमथोच्चनासम् ॥ २॥

शशाङ्कसूर्यानलदीप्तनेत्रं सटास्फुरन्तं स ददर्श दैत्यः ।
अयं सपत्नः सभयो ममेति जगाद खड्गेन जघान तीव्रम् ॥ ३॥

तत्खड्गघातेन चुकोप देवश्चक्रे सुनादं दितिनन्दनालये ।
तदालयं तच्च पुरं जगत्त्रयं सुकम्पितं तेन विषण्णमासीत् ॥ ४॥

सुरा नराः पन्नगपक्षिवर्याः सम्मोहितास्ते सभया निलिल्यिरे ।
अथोग्रतेजा मृगराजरूपं जग्राह दीप्तं दितिनन्दनार्थम् ॥ ५॥

तं खड्गपाणिं प्रलपन्तमुच्चैर्जग्राह तं व्याघ्र इवोचितं पशुम् ।
क्रोधेन जान्वोरभिपात्य शीघ्रं ददार वक्षः करजैः स तस्य ॥ ६॥

अन्त्राणि चोत्कृत्य ससर्ज कण्ठे प्राणाञ्जहौ तत्क्षणमेव दैत्यः ॥ ७॥

निहतं तं तदा दृष्टवा पितरं चापिराधिनम् ।
उत्थाय परमोद्विग्नः प्रह्लादः प्रणनाम ह ॥

बद्धाञ्जलिपुटः श्रीशं तुष्टावानन्दनिर्भरः ॥ ८॥

प्रह्लाद उवाच-
नृहरे तवनामचिन्तनं भविता सिद्धिकरं निरन्तरम् ।
यदि जन्मसु चार्जितं महत्सुकृतं तत्सुफलं नृणां भवेत् ॥ ९॥

न वास्ति सत्वा न वा रिपुर्भगवंस्त्वं गुणसङ्गवर्जितः ।
विषमा तवभूतसङ्गता ननुमायापरितो दुरत्यया ॥ १०॥

अत एव तया विहितो न भजत्यन्यविलोचनो हि सः ।

समता तव यद्यपि प्रभो न च वैषम्यलवो हि कुत्रचित् ॥ ११॥

गुणतो जनता जडा हरे विषमं पश्यति नोत्यमं कदा ।
स्वमरुज्ज्वलनाम्बुमेदिनि समवायेन शरीरमन्दिरम् ॥ १२॥

परिनिर्मितमत्र ते कला विशति प्राणपरा विशेषतः ।
सहसानुरूपं हि चेष्टते जगदेतत् खलु जीवमायया ॥ १३॥

यदि वात्र दिवानिशं मुदा रमते केवलमिन्द्रियानुगम् ।
बहुदुःखपरम्परा न तं परितः क्लेशसहं जहाति वै ॥ १४॥

मलिनत्वमुपैति कर्मणा धनदारात्मजगेहहेतुना ।
कुरुते विविधं फलेच्छया परितः संशय हेतुमीहते ॥ १५॥

अभिमानमदात्तचेतनो न च ते नाम गृणात्यहो जडः ।
न तवाङ्घ्रिसरोजसेवया हरतेस्त्वां जडतामतार्किताम् ॥ १६॥

भजतामभयं ददासि भो इति मत्वा भजने गतं मनः ।
मम देव गुरुगुहानुगं न च तद्दोषफलं भजत्यहो ॥ १७॥

अखिलानि हिनस्त्यघानि वा तव नामस्मृतिरत्र केवला ।
सकलेन्द्रियहेतुसेवनान्महदेनः क्षणतोऽपि नश्यति ॥ १८॥

अपराधिजनं बतानतं स्वहिताचारविचारविच्युतम् ।
तव भक्तमितो हि रक्ष मां नय तात ममभुक्तिमुत्तमाम् ॥ १९॥

हर में भवबन्धनं पितुः न च किञ्चिदिहास्ति साधनम् ।
अमुना तव हेलना कृता गतिमिष्टां लभतां तथाप्यसौ ॥ २०॥

वसिष्ठ उवाच-
प्रह्लादेन स्तुतो देवः सन्तुष्टो भगवान् हरिः ।
भक्त्या च परमप्रीतः प्रसन्नस्थो जगाद तम् ॥ २१॥

भक्त्या वशीकृतश्चाहं त्वया दैत्यकुलोत्तम ।
तवादेयं न मेऽत्रास्ति यतो भक्तिर्गरीयसी ॥ २२॥

अयं ते निहतस्तातस्तेन मा रुषितो भव ।
एतस्यैवापराधेन निहन्तोऽयं मया न च ॥ २३॥

सायुज्यं मे गतो दैत्यस्त्वं चैवात्र स्थिरो भव ।
कुरु राज्यं महाभाग बलेरिव सुनिलम् ॥ २४॥

चिरं भुक्त्वा सुखं चात्र ततो मामाप्नुहि स्वयम् ।
इति दत्वा वरं तस्मै पुनः प्राह दयानिधिः ॥ २५॥

प्रह्लाद मे स्तुतिर्दिव्या कृताचाध्यात्मदायिनी ।
अनया मां स्तविष्यन्ति ये नराः शुभलक्षणाः ॥ २६॥

तेषामज्ञानजं शीघ्रं नाशमायाति हृत्तमः ।
शुद्धा ज्ञानसमुत्पत्तिर्जायते नात्र संशयः ॥ २७॥

वसुसम्पन्नता नित्यं नित्यं भोगसुखोदयः ।
पशुपुत्रायुतं गेहं भविष्यति न चान्यथा ॥ २८॥

इत्थमाभाष्य तं भक्तं प्रह्लादं ज्ञानिनां वरम् ।
भगवान् प्रययौ चाथ नखशुद्ध्यै जगत्पतिः ॥ २९॥

कृतशौचं समुद्दिश्य तीर्थानां प्रवरं पुरा ।
पयोवहा नदी रम्या पयोष्णी पापनाशिनी ॥ ३०॥

यत्रास्ति दोषशमनी तत्रदेवो मनो दधौ ।
मध्ये मार्गे ददर्शाथ वत्सगुल्मं सुपावनम् ॥ ३१॥

क्षणं विश्राममकरोज्जलार्थी वत्सकानने ।
न दृष्ट्वा जलं देवस्तदा कुण्डं चकार सः ॥ ३२॥

तत्र स्नात्वा च पीत्वा च नारसिंहो जनार्दनः ।
कुण्डप्राच्यां स्वनाम्ना च मूर्तिं कृत्वा मनोहराम् ॥ ३३॥

स्वां कलां तत्र चावेश्य कृतशौचं ययौ जवात् ।
तदारभ्य नृसिंहाख्यं तीर्थं जातं नृपोत्तम ॥ ३४॥

तास्मि तीर्थे नरः स्नात्वा भक्त्या देवं जगद्गुरुम् ।
पश्यत् स नैव पापेन युज्यते नात्र संशयः ॥ ३५॥

मन्दवारे विशेषेण तत्कुण्डे स्नानमाचरेत् ।
दर्शनं नृहरेः कृत्वा मुक्तो भवति किल्बिषात् ॥ ३६॥

स्तुतिस्तोत्रैः पवित्रैश्च श्रुतिस्मृतिसमुद्भवैः ।
संस्तुत्य कमलाकान्तं नरो याति न दुर्गतिम् ॥ ३७॥

तदग्रे नन्दितीर्थं च पवित्रं पापनाशनम् ।

तत्र स्नानेन दानेन कोटियज्ञफलं लभेत् ॥ ३८॥

इति श्रीपद्मपुराणे वत्सगुल्ममाहात्म्ये नृसिंहतीर्थाख्यानवर्णनं नाम चतुर्दशोऽध्यायः ।

Proofread by M K Barman

Nrisimhatirtha Akhyanavarnanam

pdf was typeset on October 27, 2025

Please send corrections to *sanskrit@cheerful.com*